क्रम सं०

विषयः अर्थ काण्ड

प्रवेश सं० २८०२६

ग्रन्थकार

नाम सत्यनारायणपूजाविधिः

पत्र सं० १-८

अक्षर सं० (पंक्तौ) 33

पंक्ति सं० (पृष्ठे) 10

श्लोक सं०

आधार: का०

लिपि: देवना०

आकार: ८.५ X ४.४

सं० १८२६

वि० विवरण पू०

बी० उ० यू० पा०—८८ सम० और० ई०—१४५९—१०,०००

609580

Indira Gandhi National Centre for the Arts

॥ श्रीसत्यनारायणपूजाप्रारंभः ॥

Indira Gandhi National
Centre for the Arts

॥श्रीगणेशायनमः॥सत्यनारायणपूजाप्रारंभः॥ ॥व्रतीसंक्रमणे पौर्णिमायामेकादश्यां वा
यस्मिन्कस्मिं दिनेवासायंसंध्योत्तरं रजनीमुखेपूर्वं गारमागत्याहतवाससीपरिधायोपवि
श्य गणपतिवरुणमातृकापूजनपूर्वकं पुण्याहवाचनं कृत्वाव्रतं कुर्यात्॥ व्रतादौ स्वस्तिवाच
नस्यापेक्षितत्वात्॥अयमुत्तमः प्रकारः स्वस्तिवाचनं कार्यं मिति॥नहिचेद्गणपतिपूजनंवा॥
आचम्य॥पवित्रपाणिः प्राणानायम्य॥सुमुखश्चेति गणपतिं संप्रार्थ्य॥देशकालौ स्मृत्वा
विष्णोर्विष्णोः श्रीमद्भगवतो॰पुण्यतिथौ अमुकगोत्रस्यामुकशर्मणो मम सकलदु
रितोपशमनकृतमनोभिलषितासिध्यर्थं पूर्वांगीभूतश्रीसत्यनारायणमहाविष्णुप्रीत्यर्थं कथा
श्रवणपूर्वकं श्रीसत्यनारायणपूजनमहं करिष्ये॥ आदौ भूतोच्चाटनं॥यदत्रसंस्थितंभूतंस्थानमा अपासनवि
श्रित्यसर्वदा॥स्थानंत्यक्त्वातुतत्सर्वं यत्रस्थं तत्रगच्छतु॥१॥अपसर्पंतुये भूता ये भूताभूमिसं धिः॥३
स्थिताः॥ये भूताविघ्नकर्तारस्ते नश्यंतुशिवाज्ञया॥२॥अपक्रामंतुभूतानिपिशाचाःसर्वतोदिशं॥ ॥१॥



सर्वेषामविरोधेन ब्रह्मकर्म समारभेत्॥३॥ भूतप्रेतादि बाधा अपक्रामंतु॥ इत्यासनादस्याद्भु
जं त्वन्य स्वीकुर्वे ममेमं ॥४॥ ॐ आधारशक्ति कमलासनाय नमः॥इत्यासनं संपूज्य॥ तत्र प्राङ्मु
खोदङ्मुखो वा सिद्धासने उपविशेत्॥ तत्रासनप्रकारः॥पृथ्वीत्यस्य मंत्रस्य मेरुपृष्ठ
ऋषिः॥कूर्मो देवता॥सुतलं छंदः॥आसने विनियोगः॥ कूर्मपृष्ठ॥पृथ्व्यनुष्टुप॥पृथ्वी त्वया धृ इत्यासनं संपूज्य
ना ५ ता लोका देवि त्वं विष्णुना धृता॥त्वं च धारय मां देवी पवित्रं कुरु चासनं॥इत्यासनप्रकारः॥अथ मिति
भूतशुद्धिः॥पादादिजानुपर्यंतं पृथ्वीस्थानं तच्चतुरस्रं पीतवर्णं वज्रलांछितं लंबीजयु
क्तं ध्यायेत्॥ततो जान्वादिनाभिपर्यंतमपां स्थानं तच्चार्धचंद्राकारं शुक्लवर्णं पद्मलांछितं वं
मिति बीजयुक्तं ध्यायेत्॥नाभ्यादिकंठपर्यंतं अग्निस्थानं तत्त्रिकोणाकारं रक्तवर्णं स्वस्तिक
लांछितं रंमिति बीजयुक्तं ध्यायेत्॥कंठादिभ्रुवंपर्यंतं वायुस्थानं षट्कोणाकारं धूम्रबिंदुलांछि
तं धूम्रवर्णं यंमिति बीजयुक्तं ध्यायेत्॥भ्रूमध्यान्मूर्धपर्यंतं आकाशस्थानं वर्तुलाकारं ध्वज

Indira Gandhi National
Centre for the Arts

सत्य॰कृत्वा

॥२॥ ॐ दिशं धूम्रवर्णं हमिति बीजयुक्तं ध्यायेत्॥ एवं स्वशरीरे पंचमहाभूतान्ध्यात्वा॥ ततः प्रविलापनं कु
म॰ र्यात्॥ पृथ्वीमप्सु आपोग्नौ अग्निं वायौ वायुमाकाशे आकाशं तन्मात्राहंकारमहत्तालिकायां मातृकां सं
शकश क्षअलम्स्वरूपायां हल्लेखार्थभूतायां प्रकृतिमायायां प्रविलापयामि॥ तथापि धां मायां चनित्य
शुद्धबुद्धमुक्तस्वभावं स॰ च्चिदानंदस्वरूपं परिपूर्णं ब्रह्मी वाहमस्मीति ध्यायेत्॥ एवं ध्यात्वा॥ यथोक्त
स्वरूपात् प्रणवात्मकः त्परब्रह्मणः सकाशात् हल्लेखार्थभूता सर्वमंत्रमयो मातृकाशक्तिकशक्ष
अंतत्ता लिक महदहंकारादिपंचतन्मात्रादिसमस्तप्रपंचनकारणभूता प्रकृतिरूपमायारज्जुसर्पव
त्विवर्तरूपेण प्रादुर्भूता इति ध्यात्वा तस्यां मायायाः सकाशाद्यथोक्तमातृकामुत्पन्नं आकाशाद्वायुरु
त्पन्नः वायोराग्निरग्नेरापः अद्भ्यः पृथ्वी इति जायत इति ध्यात्वा॥ तेभ्यः पंचमहाभूतेभ्यः सकाशात्स्व ॥२॥
शरीरे तेजोमयं पुण्यात्मकं पुरुषार्थसाधनं देवताराधनयोग्यमिति ध्यात्वा॥ तस्मिन्शरीरे सर्वात्मकं
सर्वज्ञं सर्वशक्तिसमन्वितं समस्तदेवतामयं सच्चिदानंदस्वरूपं ब्रह्मात्मरूपेणानुप्रतिष्ठितमिति भाव

प्रातः ... नानुध्येय हिमस्य ... तिनयभिर्भैर्वैरावेशं जेत्॥ ... ॥ नमस्तेहरते देवेश॥६॥
अपामिदं ... अग्नेपावक॰ ... ॥
येदेवादेवानां॰ ... येदेवादेवेभ्य॰ धिष्णु॥१॥
यत्॥ एवंभावनामुख्या॥ इति भूतशुद्धिः॥ अथ प्राणप्रतिष्ठा॥ अस्य श्रीप्राणप्रतिष्ठामंत्रस्य ब्रह्म
नमः विष्णुरुद्रऋषिभ्यो॥ शिरसि॥ ऋग्यजुःसामाथर्वणः छंदेभ्यो नमः मुखे॥ सकलजगत्सृष्टिकारिणी प्राण क्रौं ... नमः
शक्तिर्देवतायै हृदयायेनमः॥ आं बीजाय ह्रीं नमः॥ क्रौं शक्तये नमः पादयोः॥ धर्मार्थकाममोक्षार्थे
जपे विनियोगः॥ ॐ अं कं खं गं घं ङं आकाशवायुवह्निजलभूम्यात्मने अं अंगुष्ठाभ्यां नमः॥ ॐ
ईं चं छं जं झं ञं शब्दस्पर्शरूपरसगंधात्मने ईं तर्जनीभ्यां नमः॥ ॐ उं टं ठं डं ढं णं श्रोत्रत्वक्चक्षुर्जिह्वाघ्रा
णात्मने उं मध्यमाभ्यां नमः॥ ॐ ऐं तं थं दं धं नं वाक्पाणिपादपायूपस्थात्मने ऐं अनामिकाभ्यां नमः॥
ॐ औं पं फं बं भं मं वचनादानगतिविसर्गानंदात्मने औं कनिष्ठिकाभ्यां नमः॥ ॐ अं यं रं लं वं शं षं सं हं
ळं क्षं बुद्धिमनोहंकारचित्तविज्ञानात्मने अः करतलकरपृष्ठाभ्यां नमः॥ एवमेव हृदयादिन्यासः॥ ॐ
अं कं खं गं घं ङं आकाशवायुवह्निजलभूम्यात्मने अं हृदयाय नमः॥ ॐ ईं चं छं जं झं ञं शब्दस्पर्शरूपरसगंधात्म
ॐ नेईं शिरसे नमः॥ ॐ उं टं ठं डं ढं णं श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणात्मने उं शिखायै वौषट्॥ ॐ ऐं तं थं दं धं नं वाक्पा

Indira Gandhi National
Centre for the Arts

सत्य-पूजा

॥३॥ णि पादपायूपस्थात्मने ऐं कन्ध्यायहुं॥ ॐ ओं वं के वं भं मं वचनादानगतिविसर्गात्मने ओं नेत्रत्रयनाषट्॥
ॐ अं यं रं लं वं शं षं सं हं ळं क्षं बुद्धिमनोहंकारचित्तविज्ञानात्मने अः अस्त्रायफट्॥ इति षडंगन्यासः॥
ॐ अं यं रं लं वं शं षं सं हं ळं क्षं ॥ मनोहंकार। चित्तविज्ञानात्मने अः अस्त्रायफट्॥ हृदयपर्यंतं क्रों नमः॥ ततो
ततो नाभितः पादपर्यंतं ओं नमः॥ हृदयान्नाभिपर्यंतं ह्रीं नमः॥ मूर्द्धादिहृदयपर्यंतं क्रों नमः॥ ततो
हृदयकमले न्यसेत्॥ यं त्वगात्मने नमः॥ वायुकोणे॥ रं रक्तात्मने नमः॥ अग्निकोणे॥ लं मांसात्मने नमः॥
पश्चिमे ५ पूर्वे॥ वं वेदात्मने नमः॥ शं अस्थ्यात्मने नमः॥ ईशानकोणे॥ षं मज्जात्मने नमः॥ नैर्ऋत्यकोणे॥ सं शुक्रा
त्मने नमः॥ उत्तरे॥ हं प्राणात्मने नमः॥ दक्षिणे॥ लं जीवात्मने नमः॥ मध्ये॥ हृत्कमले न्यसेत्॥ अथ
ध्यानं॥ रक्तांभोधिस्थपोतोल्लसदरुणसरोजाधिरूढा कराब्जैः पाशं कोदंडमिक्षु॰ द्भवमथगुणमप्यं॰ कुशं
पंचबाणान्॥ बिभ्राणासृक्कपालं त्रिनयनलसिता पीनवक्षोरुहाढ्या देवी बालार्कवर्णा भवतु सुखकरी
प्राणशक्तिः परा नः॥ इति ध्यात्वा हृदि निधाय मंत्रं जपेत्॥ ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हं हंसः सो ॥३॥
हं मम प्राण इह प्राणाः॥ ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हं हंसः सोहं मम जीव इह स्थितः॥ ॐ आं ह्रीं क्रों यं रं

सत्यनारायण ५ मं मं प्राण इह प्राणाः॥ ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हं हंसः सोहं मम जीव इह स्थितः॥ ॐ आं ह्रीं क्रों यं रं

सत्यनारायणस्य २

सत्यनारायणस्य २

लं वं शं षं सहं हंसः सोहं मम सर्वेन्द्रियाणि॥ ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हं हंसः सोहं मम वाङ्मनश्चक्षुः श्रोत्र
जिह्वा घ्राण प्राणा इहागत्य सुखं चिरं तिष्ठंतु स्वाहा॥ प्राणदा इति मंत्रेणाभिमंत्रणं॥ प्राणापानव्यानोदानसमान॥१॥ गर्भा
प्रतिमायां हस्तं निधाय २ धानादिवं नरा रक्षं कार सि अर्थं नद्रमपारं गणपारात्तं दरिद्र्यं॥ ॐ ॐ ॐ ॐ ॐ ॐ ॐ ॐ ॐ ॐ ॐ ॐ ॐ ॐ ॐ॥
धानादिवं नरा रक्षं कारसि अर्थं इति प्राणप्रतिष्ठा॥ अथ गणपतिपूजनं॥ कलशपूजनं॥ कलशोदकेन पूजासंभारान् संप्रोक्ष्य॥ आगमार्थं तु देवानां
इति प्राणप्रतिष्ठा॥ अथ गणपतिपूजनं॥ कलशपूजनं॥ कलशोदकेन पूजासंभारान् संप्रोक्ष्य॥ आगमार्थं तु देवानां
गमनार्थं तु रक्षसां॥ कुर्वे घंटारवं तत्र देवताह्वानलांछनं॥१॥ इति घंटां संपूज्य॥ शंखं संपूजयेत्॥ त्वं पुरा सागरोत्पन्नो
नो विष्णुना विधृतः करे॥ पूजितः सर्वदेवैश्च पांचजन्य नमोस्तु ते॥२॥ अथ द्वादशाक्षरीविद्यान्यासः॥ ॐ ॐ ॐ शिर
सि॥ ॐ नं ॐ मुखे॥ ॐ मों ॐ उरसि॥ ॐ नां ॐ हृदि॥ ॐ रां ॐ उदरे॥ ॐ यं ॐ ऊर्वोः॥ ॐ णां ॐ जान्वोः॥ ॐ यं ॐ पादयोः
अथ द्वादशाक्षरीविद्यान्यासः॥ तत्रादौ दक्षिणहस्ते॥ ॐ ॐ ॐ तर्जन्यै नमः॥ ॐ नं ॐ मध्यमायै नमः॥ ॐ मों ॐ अ
नामिकायै नमः॥ ॐ भं ॐ कनिष्ठिकायै नमः॥ अथ वामे॥ ॐ गं ॐ कनिष्ठिकायै नमः॥ ॐ वं ॐ अनामिकायै न
मः॥ ॐ तें ॐ मध्यमायै नमः॥ ॐ वां ॐ तर्जन्यै नमः॥ ॐ सु ॐ दक्षिणांगुष्ठादिपर्वणे नमः॥ ॐ दें ॐ दक्षिणांगुष्ठांत

Indira Gandhi National
Centre for the Arts

पर्वणे नमः॥ ॐ वीं ॐ वामांगुष्ठादिपर्वणे नमः॥ ॐ यं ॐ वामांगुष्ठांतपर्वणे नमः॥ अथ पञ्चांगन्यासः॥
ॐ ॐ ॐ हृदि॥ ॐ विं ॐ मूर्ध्नि॥ ॐ षं ॐ भ्रुवोः॥ ॐ णों ॐ शिखायां॥ ॐ वें ॐ नेत्रयोः॥ ॐ नं ॐ सर्वसंधिषु॥
ॐ मं ॐ अस्त्राय फट्॥ ॐ सत्यनारायणाय नमः इत्यादि गंधः॥ ततः कलशस्थापनं॥ मही द्यौरित्यादि॥ कल
शस्योपरि न्यूनं संस्थाप्य॥ संपूज्य॥ कलशोपरि पृथग्वा वक्ष्यमाणदेवतास्थापनं॥ गणपतये नमः गणपतिं
आवाहयामि॥१॥ दुर्गायै नमः दुर्गां आ०॥२॥ वायवे नमः वायुं आ०॥३॥ आकाशाय नमः आकाशं आ०॥४॥ अश्विभ्यां नमः
अश्विनौ आ०॥५॥ लक्ष्म्यै नमः लक्ष्मीं आ०॥६॥ सरस्वत्यै नमः सरस्वतीं आ०॥७॥ आदिपुरुषाय नमः आदिपुरु
षं आ०॥८॥ इन्द्रादिदिक्पालावाहनं॥ इन्द्राय नमः इन्द्रं आ०॥१॥ अग्नये नमः अग्निं आ०॥२॥ यमाय नमः यमं आ०॥३॥
निर्ऋतये नमः निर्ऋतिं आ०॥४॥ वरुणाय नमः वरुणं आ०॥५॥ वायवे नमः वायुं आवा०॥६॥ सोमाय नमः सो
मं आ०॥७॥ ईश्वराय नमः ईश्वरं आ०॥८॥ नवग्रहाश्च॥ आदित्याय नमः आदित्यं आ०॥१॥ सोमाय नमः सोमं आ०
॥२॥ भौमाय नमः भौमं आ०॥३॥ बुधाय नमः बुधं आ०॥४॥ बृहस्पतये नमः बृहस्पतिं आ०॥५॥ शुक्राय नमः शुक्रं आ०॥६॥ ॥७॥

शनैश्चराय नमः शनैश्चरं आ०॥७॥ राहवे नमः राहुं आ०॥८॥ केतवे नमः केतुं आ०॥९॥ श्रियै नमः श्रीं आ०॥१॥
रामाय नमः रामं आ०॥२॥ लक्ष्मणाय नमः लक्ष्मणं आ०॥३॥ द्विजाय नमः द्विजं आ०॥४॥ अनंताय नमः अनंतं
आ०॥५॥ गौर्यादिषोडशमातरश्च॥ गौर्यै नमः गौरीं आ०॥१॥ पद्मायै नमः पद्मां आ०॥२॥ शच्यै नमः शचीं आ०॥३॥
मेधायै नमः मेधां आ०॥४॥ सावित्र्यै नमः सावित्रीं आ०॥५॥ विजयायै नमः विजयां आ०॥६॥ जयायै नमः ज
यां आ०॥७॥ देवसेनायै नमः देवसेनां आ०॥८॥ स्वधायै नमः स्वधां आ०॥९॥ स्वाहायै नमः स्वाहां आ०॥१०॥
मातृभ्यो नमः मातॄन् आ०॥११॥ लोकमातृभ्यो नमः लोकमातॄन् आ०॥१२॥ धृत्यै नमः धृतिं आ०॥१३॥ पुष्ट्यै न
मः पुष्टिं आ०॥१४॥ तुष्ट्यै नमः तुष्टिं आ०॥१५॥ आत्मनः कुलदेवतायै नमः कुलदेवतां आवाहयामि स्थापयामि॥१६॥
एताः अक्षतवारिभिर्देवताः संपूज्य॥ पूर्णपात्रोपरि सत्यनारायणं स्थापयेत्॥ शालग्रामशिलां धातुमूर्तिं
सुवर्णादिनिर्मितसत्यनारायण पाषाणप्रतिमां वा स्थापयेत्॥ तत्र प्रतिमायाः पूर्वोक्तां प्राणप्रतिष्ठां कुर्यात्॥ स्त्रीशूद्रयोः पौराणैर्मंत्रैः पू
जनं॥ अथ पुष्पाणि गृहीत्वा सत्यं ध्यायेत्॥ ॐ तत्सत्यं गुणातीतं गुणत्रयसमन्वितं॥ लोकनाथं त्रिलोकेशं

अथवा नित्यपूजितरू

Indira Gandhi National
Centre for the Arts

कौस्तुभाभरणं हरिं॥१॥ नीलवर्णं पीतवस्त्रं शंखचक्रगदाधरं॥ नारायणं चतुर्बाहुं श्रीवत्सपदभूषितं॥२॥
गोविंदं गोकुलानंदं गजवक्त्रार्चितं स्वयं॥ पद्मासंजास्यवदनं लक्ष्मीयुक्तं वरप्रदं॥३॥ इति निमिभांके ध्यानं॥
सहस्रशीर्षेत्यावाहनं॥ आगच्छागच्छ देवेश तेजोराशिर्जगत्पते॥ क्रीयमाणां मयापूजां गृहाण सुरस
त्तम॥ पुरुष एवेदमित्यासनं॥ नानारत्नसमायुक्तं कार्तस्वरविभूषितं॥ आसनं गृह्यतां देव सर्वश्री
तम॥ पुरुष एवेदमित्यासनं॥ नानारत्नसमायुक्तं कार्तस्वरविभूषितं॥ पद्यं गृहाण देवेश मम सौख्यं वि
देवंताम्रपात्रे आनीय॥ वर्धय॥ एतावानस्येति पाद्यं॥ नारायण नमस्तेस्तु नरकार्णवतारक॥ मयानिवेदितो भक्त्या अर्घ्योयं
वर्द्धय॥ त्रिपादूर्ध्व इत्यर्घ्यं॥ व्यक्ताव्यक्तस्वरूपाय हृषीकपतये नमः॥ मयानिवेदितो भक्त्या अर्घ्योयं
प्रतिगृह्यतां॥ ततो विराळित्याचमनीयं॥ मंदाकिन्यास्तु यद्वारि सर्वपापहरं शुभं॥ तदिदं कल्पितं
देवसम्यगाचम्यतां प्रभो॥ तस्माद्यज्ञात्सर्वहुतः संभृतमिति स्नानं॥ गंगादिसर्वतीर्थेभ्यो मया ॥५॥
प्रार्थनया हृतं॥ तोयमेतत्सुखस्पर्शं स्नानार्थं प्रतिगृह्यतां॥ अथ पंचामृतस्नानं॥ पयः पृथि
व्यामिति पयः स्नानं॥ सुरभिस्तनसंभूतं देवानामपि दुर्लभं॥ पयो ददामि देवेश स्नानार्थं प्रतिगृह्यतां॥

पयः स्नानांते शुद्धोदकस्नानं समर्पयामि॥ दधिक्राव्ण इति दधिस्नानं॥ चंद्रमंडलसंकाशं सर्वदेवप्रि
यं दधि॥ स्नानार्थं ते मया भक्त्या गृह्यतां परमेश्वर॥ दधिस्नानांते शुद्धोदकस्नानं॥ घृतं मिमिक्ष इति
घृतस्नानं॥ आज्यं सुराणामाहारमाज्यं यज्ञे प्रतिष्ठितं॥ [illegible] स्नानार्थं प्रतिगृह्यतां॥ घृ
तस्नानांते शुद्धोदकस्नानं॥ मधुवाता इति मधुस्नानं॥ सर्वौषधिसमुत्पन्नं पीयूषसदृशं मधु॥
स्नानार्थं ते मया दत्तं गृह्यतां परमेश्वर॥ मधुस्नानांते शुद्धोदकस्नानं॥ अपांरसमिति शार्करस्नानं॥
इक्षुरससमुत्पन्नां स्निग्धां सुमधुरां विभो॥ स्नानार्थं ते मया दत्तां शर्करां स्वीकार्यतां प्रभो॥ शार्करस्नानांते शु
द्धोदकस्नानं॥ स्नानं पंचामृतैर्देव गृहाण पुरुषोत्तम॥ अनाथनाथ सर्वज्ञ गीर्वाणप्रणताय च॥ पश्चेन गं
धोदकयक्षकर्दमस्नानं॥ शुद्धोदकस्नानं च॥ ३ अथाभ्यंगस्नानं॥ अंजंति त्वेति सुगंधतैलेनानुलेपनं॥ पंचामृतानां पंचोपचारां पूजां
अहिरिव भोगैरिति हरिद्रया उद्वर्तनं॥ तस्मा पत्नीमरसीति उष्णोदकस्नानं॥ शुद्धोदकस्नानं च॥ चंदनं स कुर्यात्॥२
मर्पयामि॥ पुष्पं स॰॥ धूपं स॰॥ दीपं स॰॥ नैवेद्यं स॰॥ एवं पंचोपचारैः संपूज्य निर्माल्यं विसृज्य॥ पुनः स

दकेन घंटानादपूर्वकं पुरुषसूक्तेन अभिषिंचेत्॥ ततः देवं कलशे निधाय वस्त्रादिकं दद्यात्॥ तस्माद्यज्ञात्सर्व
हुत ऋच इति वस्त्रद्वयं॥ नानाजातिगुणोपेतं सूक्ष्मतंतुविनिर्मितं॥ वस्त्रमेतत्सुखस्पर्शं शीतहृत्प्रीते
गृह्यतां॥ तस्मादश्वा इति यज्ञोपवीतं॥ ब्रह्मविष्णुमहेशाननिर्मितं ब्रह्मसूत्रकं॥ यज्ञोपवीतदानेन प्री
यतां कमलापतेः॥ तं यज्ञमिति गंधं॥ श्रीखंडं चंदनं दिव्यं गंधाढ्यं सुमनोहरं॥ विलेपनं सुरश्रेष्ठ
प्रीत्यर्थं प्रतिगृह्यतां॥ यत्पुरुषमिति पुष्पाणि॥ माल्यादीनि सुगंधीनि मालत्यादीनि वै प्रभो॥ म
यहृतानि पुष्पाणि पूजार्थं प्रतिगृह्यतां॥ अथ तुलसीपत्रैः पुष्पैर्वांगपूजा॥ सत्यायनमः पादौ पूज
यामि॥ गुणप्रदायनमः गुल्फौ पू०॥ नारायणायनमः नखानि पू०॥ उपेंद्रायनमः ऊरू पू०॥ जनार्दनायन
मः जानुनी पू०॥ जगन्नाथायनमः जंघे पू०॥ अघस्थाभायनमः मेढ्रं पू०॥ कमलापतयेनमः कटिं पू०॥ हलायुधायनमः हस्ता ॥७॥
गोविंदायनमः गुह्यं पू०॥ पद्मनाभायनमः नाभिं पू०॥ दामोदरायनमः उदरं पू०॥ श्रीकंठायनमः कंठं पू०॥
नखपू०॥ चतुर्भुजायनमः चतुर्बाहून् पू०॥ हृषीकेशायनमः हृदयं पू०॥

वाचस्पतयेनमः मुखं पू०॥ कमलपत्रधरायनमः नेत्रे पू०॥ लक्ष्मीपतयेनमः ललाटं पू०॥ सहस्रशिरसे
नमः शिरः पू०॥ नारायणायनमः सर्वांगं पूजयामि॥ मिलत्परिमलामोदमत्तालिकुलनादितां॥ आनं
दनंदितोद्यानमालां स्वीकार्यतां प्रभो॥ पुष्पमालां समर्पयामि॥ ब्राह्मणोस्येति धूपं॥ गंधसंभार
तं॥४ संलक्ष्णं कालागरुसमन्वितं सुरासुरनरानंदं धूपोयं प्रतिगृह्यतां॥ चंद्रमा मनस इति दीपं॥ आ ति
ज्यवर्तिसमायुक्तं वह्निना योजितं मया॥ दीपं गृहाण देवेश त्रैलोक्यतिमिरापहं॥ भक्त्या दीपं प्र
यच्छामि देवाय परमात्मने त्राहि मां निरयाद्घोराद्दीपमंगीकुरु प्रभो॥ नाभ्या आसीदिति नैवेद्यं॥
घृतपक्वं हविष्यान्नं पायसं च ससर्करं॥ नानाविधं च नैवेद्यं भोजनार्थं प्रगृह्यतां॥ भोजना
पं३ मध्ये पानीयं समर्पयामि॥ स्नानादिकं विधायाशु यतः शुद्धिरवाप्यते॥ एतदाचमनीयं च स्वीकुरुष्व गदाधर॥
ह्युत्तरापोशानं॥ दिव्यपरिमलाढ्यं च तोयं गंगासमुद्भवं॥ करप्रक्षालनार्थं च गृह्यतां परमेश्वर॥ इति हस्तप्रक्षा
लनं॥ सर्वपापहरं दिव्यं गांगेयं निर्मलं जलं॥ मुखप्रक्षालने दत्तं गृहाण पुरुषोत्तम॥ इति मुखप्रक्षालनं॥ सु

Indira Gandhi National
Centre for the Arts

८



नं पंचपरिमलाढ्यं च गोरोचनसमन्वितं ॥ अगरुम्मृगनाभ्यं च करोद्वर्तनकं शुभं ॥ इति करोद्वर्तनं ॥ उष्णं गंगोद
॥७॥ कं दिव्यं नानागंधसुवासितं ॥ चरणक्षालनं कर्तुं गृहाण पुरुषोत्तम ॥ इति पादप्रक्षालनं ॥ यत्पुरुषेणेति फलतांबूल
दक्षिणाः ॥ इदं फलं मया देव स्थापितं पुरतस्तव ॥ तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि ॥ इति फलं ॥
पातालतलसंभूतं चंदनं भोजनं वरं ॥ नानागुणगणाकीर्णं तांबूलं प्रतिगृह्यतां ॥ इति तांबूलं स॰ ॥ हिर॰
यस्यास्ति तेऽल्पकालेशः स एव श्रीनिकेतनं ॥ तथापि ते मयोत्सृष्टा दक्षिणा प्रतिगृह्यतां ॥ इति दक्षिणा स॰ ॥
×श्रीश्रवत इत्युत्तरनीराजनदीपं ॥ चतुर्वर्तिसमायुक्तं गोघृतेनैव पूरितं ॥ नीराजनेन संतुष्टो भवत्येव जगत्प
तिः ॥ इति नीराजनं ॥ चंद्रादित्यौ च धरणी विद्युदग्निस्तथैव च ॥ त्वमेव सर्वतेजांसि आर्तिक्यं प्रतिगृह्यतां ॥
इत्यार्तिक्यं ॥ कर्पूरनिर्मितं दीपं स्वर्णपात्रे निवेदितं ॥ मयानिवेदितं दीपं गृहाण परमेश्वर ॥ इति कर्पूरार्तिक्यं ॥
×सहस्रकिरणस्पर्धिस्फुरत्किरणमंडलं ॥ दर्पणं मणिभिः क्लृप्तं गृहाण पुरुषोत्तम ॥ इति दर्पणं ॥ हारिन्मणिज ॥७॥
णाकीर्णं ... क्तिवरप्रदं ॥ सुवर्णकलशास्त्रं गृहाण ... ॥ इति छत्रं ॥ चिरनदीप्रभवैर्हेमचामरैश्च

शुभ्राभ्रशोभने ॥ स्वर्णदंडोपशोभाढ्यं गृहाण परमेश्वर ॥ इति चामरे ॥ सुवर्णनिर्मितां दीप्तां रत्नदंडोपशोभितां ॥
पताकां संप्रयच्छामि गृहाण पुरुषोत्तम ॥ इति पताकां ॥ सुवर्णपत्रघटितं मणिदंडविराजितं ॥ व्यजनं
श्रमशांत्यर्थमंगीकुरु कृपानिधे ॥ इति व्यजनं ॥ ×सत्यासत्यासंनिहितप्रदक्षिणनमस्कारैः ॥ यानि का
नि च पापानि जन्मांतरकृतानि च ॥ तानि तानि विनश्यंति प्रदक्षिणपदे पदे ॥ इति प्रदक्षिणा ॥ अन्यथा श
रणं नास्ति त्वमेव शरणं मम ॥ तस्मात्कारुण्यभावेन रक्ष मां परमेश्वर ॥ इति नमस्कारः ॥ यज्ञेन यज्ञमिति मंत्रपु
जलींपु॰ ष्पां ॥ यन्मया भक्तियोगेन पत्रं पुष्पं फलं जलं ॥ निवेदितं च नैवेद्यं तद्गृहाणानुकंपया ॥ इति मंत्रपुष्पांजलिः ॥
स्तुतिभिः सहदिव्याभिः सहितं नर्तितं मम ॥ नर्तनं कल्पितं भक्त्या गृहाण परमेश्वर ॥ इति नर्तनं ॥ अथप्रा
र्थना ॥ मंत्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वर ॥ यत्पूजितं मया देव परिपूर्णं तदस्तु मे ॥ पापोऽहं पापकर्मा
हं पापात्मा पापसंभवः ॥ त्राहि मां कृपया देव सर्वपापहरो भव ॥ अमोघं पुंडरीकाक्षं नृसिंहं दैत्यसूदनं ॥ हृ
षीकेशं जगन्नाथं वागीशं वरदायकं ॥ गुणत्रयं गुणातीतं गोविंदं गरुडध्वजं ॥ जनार्दनं जनानंदं जानकी

Indira Gandhi National Centre for the Arts

वल्लभं हरिं ॥ प्रणमामि सदा भक्त्या नारायणमतः परं ॥ दुर्गमे विषमे घोरे शत्रुभिः परिपीडिते ॥ निस्तारयतु सर्वेषु तथाऽनिष्टभयेषु च ॥ नामान्येतानि संकीर्त्य ईप्सितं फलमाप्नुयात् ॥ सत्यनारायणं देवं वंदेहं कामदं प्रभुं ॥ लीलया विततं विश्वं येन तस्मै नमाम्यहं ॥ इति प्रार्थना ॥ आवाहनं न जानामि न जानामि तवार्चनं ॥ पूजां चैव न जानामि क्षम्यतां परमेश्वर ॥ यदक्षरपदभ्रष्टं मात्राहीनं तु यद्भवेत् ॥ तत्सर्वं क्षम्यतां देव प्रसीद परमेश्वर ॥ इति क्षमापनं ॥ यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु ॥ न्यूनं संपूर्णतां याति सद्यो वंदे तमच्युतं ॥ अनेन यथामिलितोपचारषोडशोपचारपूजनेन श्रीसत्यनारायणः प्रीयतां ॥ एवं पूजां समाप्य ॥ पादोर्ध्वप्रस्थपरिमितं गोधूमचूर्णं तथा पादोर्ध्वप्रस्थं शर्करा तथा पादोर्ध्वप्रस्थपरिमितं घृतं तथा पादोर्ध्वप्रस्थपरिमितं दुग्धं तथा पादोर्ध्वप्रस्थपरिमितं कदलीफलं ॥ एतान्पंचपदार्थानेकीकृत्य परिपाच्य सत्यनारायणाय निवेदयेत् ॥ अथवा पूजांते ध्येनैवेद्यसमये निवेदयेत् ॥ एवं मत्वा नैवे

परिमिता३



द्यं समर्प्य ॥ मूलमंत्रमष्टोत्तरशतं जप्त्वा कथां शृणुयात् ॥ ॥ इति सत्यनारायणपूजाविधिः ॥ ॥
श्रीसत्यनारायणार्पणमस्तु ॥ ॥ इदं पुस्तकं चतुर्वेद्युपाह्व वेणीराम भट्टेन लिखितं ॥ ॥
संवत् १९ २६ मीती भाद्र वद शुद्ध ८ ॥ इदुवार ॥ ॥ ॥ ॥ ॥ ॥
॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥

Indira Gandhi National
Centre for the Arts

॥श्रीसत्यनारायणपूजासमाप्ता॥

Indira Gandhi National
Centre for the Arts